National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(56): 224-225
© 2024 NJHSR
www.sanskritarticle.com

**श्रीधर राउतः**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**ममतासिं**
अनुसन्धात्री,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपति

# गीतभारते भारतवर्षवैभवम्

**श्रीधर राउतः**

**उपक्रमः**

**वर्षाणां भारतं श्रेष्ठं देशानामुत्कल श्रुतः।**
**उत्कलस्य समदेशो क्वापि नास्ति महीतले॥**[1]

उक्तिरियं कपिलसंहितायाः भारतवर्षस्य उत्कलस्य च गौरवगाथां प्रकटयति। भारतदेशः देशानाम् अग्रगण्यः। विश्वगुरुः इति उच्यते। भारतदेशोऽयं समग्रविश्वे स्वविजयपताकां उड्डयन् सर्वान् देशान् जागरयति। तस्य प्राकृतिकसौन्दर्यं कला-साहित्य-संस्कृतिश्च विश्वे प्रसिद्धो वर्तते। भारतवर्षं भ्रमणं कृत्वा कविः डॉ. क्षीरोदचन्द्रदाशमहोदयः "गीतभारतम्"पुस्तकमिदं रचितवान्। तत्र भारतस्य गौरववैभवविमण्डितां सौन्दर्यशालिदशां कविः वर्णयति।

**कूटशव्दाः-**
उत्कलगानम्, उत्तरभारतम्, केरलधामगानम्, गुजुराटधामगानम्, गोवागानम्, जाम्मुकाश्मीरधामगानम्, त्रिपुराधामगानम्।

**कविपरिचयः-**

कविः तस्य पुण्यजन्मभूमेः पवित्रवातावरणेन नूनं प्रभावितो भवति। पवित्रभारतभूखण्डे ओडिशाराज्यस्य संस्कृतविद्वत्सु डॉ. क्षीरोदचन्द्रदाशः अन्यतमः। सः १९५४ तमे सम्बत्सरे ओडिशाराज्यस्य कटकमण्डलान्तर्गत "माहाङ्गा" विधानसभाक्षेत्रे "नुर्तङ्ग" ग्रामे जन्मग्रहणं कृतवान्। सम्प्रति डॉ. क्षीरोदचन्द्रदाशमहोदयः स्वस्य जन्मस्थानं विहाय ओडिशाराज्यस्य खोर्द्धाजिल्ला–अन्तर्गत-भुवनेश्वरनिकटस्थ 'पात्रपडा'-अञ्चलस्य उदयनगिरिविहारे निवसति।

कविः आभारतं भ्रमणं कृत्वा स्वीयानुभूतिं "गीतभारतम्" इति पुस्तके वर्णयति। गीतभारतम् इति पुस्तके द्वांत्रिशत् सर्गाः सन्ति। तत्र प्रथमसर्गे कविः भारतगानं कृत्वा अन्तिमे विश्वगानं करोति। भारतगानम् इति कवितायां –

भारतमहासागरस्य उत्तरभागे स्थिताम् अहिमगिरितः हिमगिरिं यावत् वस्तुतः व्याप्तः देशविशेषः तस्मिन् धाम्नि तद् भारतधाम इत्यर्थः। विन्ध्य महेन्द्र मलयगिरि-सह्यक-सुक्तिक-पारियात्राः इति कुलाचलाः यस्मिन् धाम्नि तद्भारतं धाम। कविः भारतं मानवानां देवानाम् च भूलोकधामः इति वर्णयित्वा उक्तं यत्-

**स्वर्णिभमादृतमिह भुवनं हृदि मानद-मानव-नीडम्।**
**श्रुतिमधुरध्वनि-काकलि-सम्मत-नव - नव-संगत-तानम्॥**[2]

अस्मिन् देशे हरितकपोत - मयूर - शतच्छद पेचक तनुकशुकादि पक्षीणाम् शोभां दर्शकानां मनोमोहयति तद् देशं भारतवर्षं मम एव इति। कविः कथयति –

**हरितकपोत-मयूर-शतच्छद-पेचक-तनुकशुकाभम्।**

**सारस-कांचन-चातक-निनटिक-कोकिल-कलित-सुरागम्।।**[3]

**उत्कलगानम् –**

उपगङ्गं हिमगिरितलगतमानवमाश्रितसंस्कृति-प्रभं हिमालयपाद-देशान्तर्गतानां पाददेशसम्मिलितानां वा मानवानाम् आश्रितायाः संस्कृतेः प्रभं सञ्जातं तदुत्कलधाम इत्यर्थः।

**हिमगिरितलगत-मानवमाश्रित-संस्कृतिप्रभमुपगङ्गम्।**

**व्यासविनोदित-कविकुलकल्पित-मुनिवरमञ्जुलदानम्॥**[4]

**उत्तरभारतम्-**

उत्तरभारतभ्रमणवेलायां रामज-कृष्णज-पावनघामसुशोभितमस्ति। इति कविः कथयति यत्-

**स्वर्गाभं नो रामज-कृष्णज-पावन-धाम सुशोभम्।**

**जय जय जय चिरमुत्तरदिग्भूत-भारतभावनिधानम्॥**[5]

**केरलधामगानम्-**

केरलधाम्नः भारतवर्षस्य तन्नामधेयस्य निवासस्थानस्य गानम्। भारतवर्षस्य पावननिवासस्थानं नन्दनवनमिव शोभां, यत्र देवराजइन्द्रः राराजते।

**आरावाब्धेः तीरगभूमिषु नन्दनवनमिवशोभम्।**

**जय जय जय भुवि केरलधाम तु भारतभावनिधानम्॥**[6]

**गुजुराटधामगानम्-**

बहुजनसंस्कृतिसारसमाहृत्य बहुजनसङ्गमतीर्थं बहुविधानं मानवानां संस्कृतीनां समाहृतेन संग्रहेण मिलितं तीर्थं पावनस्थानं यस्मिन् घम्नि तत् भारतवर्षम्। यत्र स्तपतिकलाकृतिः वैभवभासितजीवनवृत्तचरितार्थं वास्तुकलाकृतीनां वैभवेन भासितम् अलौकिकजीवनं कृतचरितार्थं गुजुराटप्रदेशम् इति। कविः कथयति-

**बहुजन-संस्कृति-सारसमाहृत-बहुजन-संगत-तीर्थम्।**

**स्थपतिकलाकृति-वैभव-भासित जीवन-कृतचरितार्थम्॥**[7]

**गोवागानम्-**

पूर्वजभारतीयसंस्कृतिसंगत पश्चिम शैल्पिकगानम्.....

**देवानां भूभारतमुपगतगोवाधाम सुतीर्थम्।**

**तज्जय जय भुवि शोभनधाम तु भारतभावनिधानम्॥**[8]

पूर्वजस्य पृथीव्याः पूर्वादिग्भागजातस्य भारतस्य संस्कृतौ संगतं युक्तं पृथीव्याः पश्चिमदिग्भागजातशिल्पकलायाः ज्ञानं यस्मिन् धाम्नि तत् भारतवर्षम्-

**पूर्वज-भारत-संस्कृति-संगत-पश्चिमशैल्पिकभानम्।**

**शोभननृत्यविनोदितजीवन-विपुलपुलकभरगानम्॥**[9]

**जाम्मुकाश्मीरधामगानम्-**

श्रीजाम्मुं तन्नामधेयं पावनस्थानं श्रितं प्राप्तं युक्तम्, पृथिव्यां मानवतीर्थं मानवानां पवित्रमिलनक्षेत्रमस्ति। भारतभावनिधाने भारतस्य भावस्य शुभचिन्तनस्य दिव्यभावनायाः वा निधानं कोषागारं तु नूनं तदुन्नतधाम् अतिप्रशंसनीयं सम्मानास्पदं च तत्स्थानं भारतवर्षम्।

**श्रीजाम्मुं श्रित-काश्मीरभुवनमिति भुवि मानवतीर्थम्।**

**तज्जय जयचिरमुन्नतधाम तु भारत भावनिधानम्॥**[10]

**त्रिपुराधामगानम्-**

भारतवर्षस्य श्रीत्रिपुरा श्रुतपावनधाम ईश्वरप्रदत्ता लक्ष्मीस्वरूपा भवति। त्रिपुरा-नामधेयं श्रुतं विख्यातं पावनधाम पवित्रनिवासस्थानं सुशोभमतिरमणीयमस्ति।

**सर्वेषां नो श्रीत्रिपुरा-श्रुतपावनधाम-सुशोभम्।**

**तज्जय जय चिरमीप्सितधाम तु भारतभावनिधानम्॥**[11]

**उपसंहार-**

भारतवर्षमिदं भूवनमोहनकारि तीर्थं भूवनस्य समग्रजगतः सर्वेषां मानवानां व्यमोहः यत् तीर्थं तत् भारतम्। पृथीव्यां शान्तिप्रदायकं शुभमङ्गलमयं देवानां निवासस्थानं भारतवर्षम्। कविः भारतभ्रमण-कृत्वा भारतस्य प्राकृतिकसौन्दर्यं अवर्णयत्। सर्वैरपि भरतभ्रमणं कृत्वा तदानन्दं प्राप्नुवन्ति इति कविः कथयति।

**सहायकग्रन्थसूची-**

1. कपिलसंहिता-श्रीराधाकृष्णवसु.एम्.ए (भुवनेश्वर)

2.गीतभारतम्-मोतिलालवनारासीदास्पब्लिकेशन्(नई दिल्ली 2002)

**पाद टिप्पणी**

1 कपिलसंहिता.पृ.2

2 गी.भा. 1/4

3 गी.भा. 2/6

4 गी.भा. 5/2

5 गी.भा. 6/1

6 गी.भा. 7/1

7 गी.भा. 9/8

8 गी.भा. 10/1

9 गी.भा. 10/8

10 गी.भा. 12/1

11 गी.भा. 16/1